# <u>यू.एस् एस्. परीक्षा संस्कृतम्</u>

पोर्टफोलियो मूल्यनिर्णयाय "सर्वे सन्तु निरामयाः" इति एककम् आधारीकृत्य निर्मितम् संस्कृतलेखनमेव आनेतव्यम्।

## <u>प्रक्रिया</u>

आरोग्यसंरक्षणसम्बन्धीनि लोखनानि, पूर्विकग्रन्थपरामर्शाः, श्लोकाः, सुभाषितानि, पत्रिकावृत्तान्तादीनि च सञ्चितुं छात्रान् निर्दिशति। (अध्यापकैः सामग्रीसञ्चयनार्थम् आवश्यकानि साहाय्यानि देयानि।) स्रञ्चितानि वस्तूनि आहारशीलं, व्यायामः, दिनचर्या, पारिस्थितिकम् इत्यादिषु चतुर्षु मेखलासु विभक्तव्याः। छात्राणां चतुरान् (4)सङ्घान् कृत्वा तत्र एतेषु विषयेषु टिप्पणिं रचयितुं च निर्दिशति।

*प्रतिमेखलं अध्यपिकायै सूचनाः*

| | |
|---|---|
| आहारशीलानुबन्धीनि | विरुद्धाहारं, मिताहारशीलम्, हिताहारः,समयनिष्ठा |
| व्यायामानुबन्धीनि | व्यायामशीलम्, योगः, यन्त्रवत्करणेन जाताः व्यायामन्यूनताः |
| दिनचर्यानुबन्धीनि | निद्रा, उत्थानम्, प्रभातकृत्यानि समयनिष्ठा |
| पारिस्थितिकम् | परिसरशुचित्वम्, परिस्थितिमलिनीकरणम्, पञ्चभूतसंरक्षणम् |

चर्चाटिप्पणीलेखने छात्रेभ्यः यथोचितम् भाषापरं साहाय्यम् अध्यापकैः देयम्।

सङ्घचर्चानन्तरं प्रतिसङ्घात् एकः छात्रः चर्चाटिप्पणिं अवतारयति। प्रत्येकावतरणे अपि अन्येभ्यः सङ्घेभ्यः छात्राः प्रतिकरणं कुर्वन्ति। अनुयोज्यप्रश्नैः प्रतिकरणैः च अध्यापकाः अपि चर्चायां भागं वहन्ति। चर्चाम् आधारीकृत्य प्रत्येकःछात्रः चर्चाटिप्पणिं परिष्कुर्वन्ति।

एवं प्रकारेण लब्धाभ्यः चर्चाटिप्पणिभ्यः आशयान् स्वीकृत्य "जीवनशैली आरोग्यसंरक्षणं च" इति विषयं अधिकृत्य लेखनं व्यक्तिगतरूपेण निर्मातव्यम्।एवं प्रकारेण निर्मितं संस्कृतलेखनमेव छात्रैः पोर्टफोलियो अङ्गतया आनेतव्यम्।

*परीक्षादिने आनेतव्यानि..........*

- *सञ्चितसामग्रीणां विवरणपट्टिका।*
- *प्रथमतया रचिता चर्चाटिप्पणिः।*
- *अवतरणानन्तरं परिष्कृता चर्चाटिप्पणिः।*
- *अन्यसङ्घानां अवतारणसमये लिखिता टिप्पणिः।*
- *लेखनम्।*
- *छात्राणां संस्कृतटिप्पणिपुस्तकम्।*

छात्रेभ्यः सूचनाः

➔लेखनस्य आशयप्रतिपादकं शीर्षकं देयम्।

➔प्रत्येकमपि आशयं व्यक्ततया अवतारणीयम्।

➔आशयान् परस्परबन्धेन अवतारणीयम्।

➔भाषा व्यक्ता शुद्धा च भवेत्।